ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

## द्वितीयकाण्डे चतुर्थः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in.**

Version 0.3 October 31, 2022

## Version Notes:

**This is now the current Version 0.3 dated October 31, 2022.**

1. This replaces the earlier version 0.2 dated Aug 31, 2020.

2. This version has been updated with the errors found and reported till Oct 31, 2022.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. In this Compilation the Samita Vaakyams have been suitably aligned, synchronised and refurbished in line with “Pada Paatam”.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th June 2019 |
| 2nd | Version Number | 0.1 dated 31st May 2020 |
| 3rd | Version Number | 0.2 dated 31st Aug 2020 |

# Contents

2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे द्वितीयं काण्डं......4

2.4 द्वितीयकाण्डे चतुर्थः प्रश्नः – इष्टिविधानं...................... 4

**ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः**

**हरिःओं**

# 2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे द्वितीयं काण्डं

## 2.4 द्वितीयकाण्डे चतुर्थः प्रश्नः – इष्टिविधानं

**TS 2.4.1.1**

देवा मनुष्याः पितरस्ते ऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्ते ऽन्यतस्तेषां देवानामुत यदल्पं ँलोहितमकुर्वन् तद्–रक्षाꣳसि रात्रीभिरसुभ्नन् तान्थ् सुब्धान् मृतानभि व्यौच्छत् ते देवा अविदुर्यो वै नो ऽयं म्रियते रक्षाꣳसि वा इमं घ्नन्तीति ते रक्षाꣳस्युपामन्त्रयन्त तान्यब्रुवन् वरं ँवृणामहै य – [ ] **1**

**TS 2.4.1.1 - Padam**

देवाः । मनुष्याः । पितरः । ते । अन्यतः । आसन्न् । असुराः । रक्षाꣳसि । पिशाचाः । ते । अन्यतः । तेषाम् । देवानाम् । उत । यत् । अल्पम् । लोहितम् । अकुर्वन्न् । तत् । रक्षाꣳसि ।

रात्रीभिरिति रात्रि–भिः । असुभ्नन्न् । तान् । सुब्धान् । मृतान् ।
अभि । वीति । औच्छत् । ते । देवाः । अविदुः । यः । वै । नः ।
अयम् । म्रियते । रक्षाꣳसि । वै । इमम् । घ्नन्ति । इति । ते ।
रक्षाꣳसि । उपेति । अमन्त्रयन्त । तानि । अब्रुवन्न् । वरम् ।
वृणामहै । यत् । **1 (50)**

**TS 2.4.1.2**

–दसुरान् जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन् ते
ऽसुरान् जित्वा रक्षाꣳस्यपानुदन्त तानि रक्षाꣳस्यनृत–मकर्तेति
समन्तं देवान् पर्यविशन् ते देवा अग्नावनाथन्त ते ऽग्नये प्रवते
पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवते ऽग्नये प्रतीकवते
यदग्नये प्रवते निरवपन्. यान्येव पुरस्ताद्–रक्षाꣳस्या – [ ] **2**

**TS 2.4.1.2 - Padam**

असुरान् । जयाम । तत् । नः । सह । असत् । इति । ततः । वै ।
देवाः । असुरान् । अजयन्न् । ते । असुरान् । जित्वा । रक्षाꣳसि ।
अपेति । अनुदन्त । तानि । रक्षाꣳसि । अनृतम् । अकर्त । इति ।
समन्तमिति सं – अन्तम् । देवान् । परीति । अविशन्न् । ते ।

दे॒वाः । अ॒ग्नौ । अ॒ना॒थ॒न्त॒ । ते । अ॒ग्नये᳚ । प्रव॑त॒ इति॒ प्र – व॒ते॒ ।
पु॒रो॒डाश᳚म् । अ॒ष्टाक॑पाल॒मित्य॒ष्टा – क॒पा॒ल॒म् । निरि॑ति ।
अ॒व॒प॒न्न् । अ॒ग्नये᳚ । वि॒बा॒ध॑व॒त इति॑ वि॒बा॒ध – व॒ते॒ ।
अ॒ग्नये᳚ । प्रती॑कव॒त इति॒ प्रती॑क – व॒ते॒ । यत् । अ॒ग्नये᳚ ।
प्रव॑त॒ इति॒ प्र – व॒ते॒ । निर॑व॒प॒न्निति॒ निः – अ॒व॒प॒न्न् । यानि॑ ।
ए॒व । पु॒रस्ता᳚त् । रक्षाꣳ॑सि । **2 (50)**

**TS 2.4.1.3**

–स॒न् तानि॒ तेन॒ प्राणु॑द॒न्त॒ यद॒ग्नये॑ वि॒बा॒ध॑व॒ते॒ यान्ये॒वाभितो॒
रक्षा॒ꣳ॒स्यासन्॒ तानि॒ तेन॒ व्य॑बाध॒न्त॒ यद॒ग्नये॒ प्रती॑कव॒ते॒ यान्ये॒व
प॒श्चाद्–रक्षा॒ꣳ॒स्यासन्॒ तानि॒ तेनापा॑नुद॒न्त॒ ततो॑ दे॒वा अभ॑व॒न् परा ऽसु॑रा॒
यो भ्रातृ॑व्यवा॒न्थ् स्याथ् स स्पर्द्ध॑मान ए॒तयेष्ट्या यजे॑ता॒ग्नये॒ प्रव॑ते
पु॒रो॒डाश॑म॒ष्टाक॑पाल॒ं निर्व॑पे॒द॒ग्नये॑ वि॒बा॒ध॑व॒ते॒ – [ ] **3**

**TS 2.4.1.3 - Padam**

आस॑न्न् । तानि॑ । तेन॑ । प्रेति॑ । अ॒नु॒द॒न्त॒ । यत् । अ॒ग्नये᳚ ।
वि॒बा॒ध॑व॒त इति॑ वि॒बा॒ध – व॒ते॒ । यानि॑ । ए॒व । अ॒भितः॑ ।

रक्षाꣳसि । आसन्न् । तानि । तेन । वीति । अबाधन्त । यत् ।

अग्नये । प्रतीकवत इति प्रतीक – वते । यानि । एव । पश्चात् ।

रक्षाꣳसि । आसन्न् । तानि । तेन । अपेति । अनुदन्त । ततः ।

देवाः । अभवन्न् । परेति । असुराः । यः । भ्रातृव्यवानिति

भ्रातृव्य – वान् । स्यात् । सः । स्पर्द्धमानः । एतया । इष्ट्या ।

यजेत । अग्नये । प्रवत इति प्र – वते । पुरोडाशम् ।

अष्टाकपालमित्यष्टा – कपालम् । निरिति । वपेत् ।

अग्नये । विबाधवत इति विबाध – वते । **3 (50)**

**TS 2.4.1.4**

ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान्–

भ्रातृव्यस्तं तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ् तं तेन

वि बाधते यदग्नये प्रतीकवते य एवास्मात् पापीयान् तं तेनाप नुदते

प्र श्रेयाꣳसं भ्रातृव्यं नुदते ऽति सदृशं क्रामति नैनं पापीयानाप्नोति

य एवं ( ) ँविद्वानेतयेष्ट्या यजते ॥ 4

**TS 2.4.1.4 - Padam**

अग्नये । प्रतीकवत इति प्रतीक – वते । यत् । अग्नये ।

प्रवत इति प्र – वते । निर्वपतीति निः – वपति । यः । एव ।

अस्मात् । श्रेयान् । भ्रातृव्यः । तम् । तेन । प्रेति । नुदते ।

यत् । अग्नये । विबाधवत इति विबाध – वते । यः । एव । एनेन ।

सदृङ्ङिति स – दृङ् । तम् । तेन । वीति । बाधते । यत् । अग्नये ।

प्रतीकवत इति प्रतीक – वते । यः । एव । अस्मात् । पापीयान् ।

तम् । तेन । अपेति । नुदते । प्रेति । श्रेयाꣳसम् । भ्रातृव्यम् ।

नुदते । अतीति । सदृशम् । क्रामति । न । एनम् । पापीयान् ।

आप्नोति । यः । एवम् ( ) । विद्वान् । एतया । इष्ट्या ।

यजते ॥ **4 (54)** ***(वृणामहै यत् – पुरस्ताद् रक्षाꣳसि– वपेदग्नये विबाधवत – एवं – चत्वारि च) (A1)***

**TS 2.4.2.1**

देवासुराः सꣳयत्ता आसन् ते देवा अब्रुवन्. यो नो वीर्यावत्तम–स्तमनु समारभामहा इति त इन्द्रमब्रुवन् त्वं वै नो वीर्यावत्तमो ऽसि त्वामनु समारभामहा इति सो ऽब्रवीत् तिस्रो म इमास्तनुवो वीर्यावतीस्ताः

प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्निय–म॒ꣳहोमुगियं

ꣳविमृधेयमिन्द्रियावती – [ ] 5

**TS 2.4.2.1 - Padam**

देवासुरा इति देव – असुराः । सꣳयत्ता इति सं – यत्ताः ।

आसन्न् । ते । देवाः । अब्रुवन्न् । यः । नः । वीर्यावत्तम इति

वीर्यावत् – तमः । तम् । अन्विति । समारभामहा इति

सं – आरभामहै । इति । ते । इन्द्रम् । अब्रुवन्न् । त्वम् । वै । नः ।

वीर्यावत्तम इति वीर्यावत् – तमः । असि । त्वाम् । अन्विति ।

समारभामहा इति सं–आरभामहै । इति । सः । अब्रवीत् । तिस्रः ।

मे । इमाः । तनुवः । वीर्यावतीरिति वीर्य – वतीः । ताः ।

प्रीणीत । अथ । असुरान् । अभीति । भविष्यथ । इति । ताः । वै ।

ब्रूहि । इति । अब्रुवन्न् । इयम् । अꣳहोमुगित्यꣳहः–मुक् । इयम् ।

विमृधेति वि – मृधा । इयम् । इन्द्रियावतीतीन्द्रिय – वती । **5 (50)**

**TS 2.4.2.2**

–त्यब्रवीत् त इन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निरवपन्निन्द्राय

वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाꣳहोमुचे निरवपन्नꣳहस एव

तेनामुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनापाघ्नतयदिन्द्रायेन्द्रियावत
इन्द्रियमेव तेनाऽऽत्मन्नदधत त्रयस्त्रि॑ꣳशत्कपालं पुरोडाशं निरवपन्
त्रयस्त्रि॑ꣳशद्-वै देवतास्ता इन्द्र आत्मन्ननु समारंभयत भूत्यै - [ ] 6

**TS 2.4.2.2 - Padam**

इति । अब्रवीत् । ते । इन्द्राय । अꣳहोमुच इत्यꣳहः - मुचे ।
पुरोडाशम् । एकादशकपालमित्येकादश - कपालम् । निरिति ।
अवपन्न् । इन्द्राय । वैमृधाय । इन्द्राय । इन्द्रियावत
इतीन्द्रिय - वते । यत् । इन्द्राय । अꣳहोमुच इत्यꣳहः - मुचे ।
निरवपन्निति निः - अवपन्न् । अꣳहसः । एव । तेन । अमुच्यन्त ।
यत् । इन्द्राय । वैमृधाय । मृधः । एव । तेन । अपेति । अघ्नत ।
यत् । इन्द्राय । इन्द्रियावत इतीन्द्रिय - वते । इन्द्रियम् ।
एव । तेन । आत्मन्न् । अदधत ।
त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत् - कपालम् ।
पुरोडाशम् । निरिति । अवपन्न् । त्रयस्त्रिꣳशदिति त्रयः - त्रिꣳशत् ।

वै । देवताः । ताः । इन्द्रः । आत्मन्न् । अन्विति ।

समारंभयतेति सं – आरंभयत । भूत्यै । **6 (50)**

**TS 2.4.2.3**

तां ँवाव देवा विजिति–मुत्तमा–मसुरै–र्व्यजयन्तयो भ्रातृव्यवान्थ्–

स्याथ् स स्पर्द्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे

पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावते–

ऽꣳहसा वा एष गृहीतो यस्माच्छ्रेयान् भ्रातृव्योयदिन्द्रायाꣳहोमुचे

निर्वपत्यꣳहस एव तेन मुच्यतेमृधा वा एषो ऽभिषण्णो यस्माथ्

समानेष्वन्यः श्रेयानुता – [ ] **7**

**TS 2.4.2.3 - Padam**

ताम् । वाव । देवाः । विजितिमिति वि – जितिम् ।

उत्तमामित्युत् – तमाम् । असुरैः । वीति । अजयन्त । यः ।

भ्रातृव्यवानिति भ्रातृव्य – वान् । स्यात् । सः । स्पर्द्धमानः ।

एतया । इष्ट्या । यजेत । इन्द्राय । अꣳहोमुच इत्यꣳहः – मुचे ।

पुरोडाशम् । एकादशकपालमित्येकादश – कपालम् । निरिति ।

वपेत् । इन्द्राय । वैमृधाय । इन्द्राय । इन्द्रियावत इतीन्द्रिय – वते ।

अ॒ꣳहसा । वै । ए॒षः । गृ॒ही॒तः । यस्मा॑त् । श्रेया॑न् । भ्रातृ॑व्यः । यत् ।
इन्द्रा॑य । अ॒ꣳ॒हो॒मु॒च इत्य॑ꣳहः – मु॒चे । नि॒र्वप॒तीति॑ निः – व॑पति ।
अꣳह॑सः । ए॒व । ते॑न । मु॒च्य॒ते॒ । मृ॒धा । वै । ए॒षः ।
अ॒भिष॑ण्ण॒ इत्य॑भि – स॒न्नः । यस्मा॑त् । स॒मा॒नेषु॑ । अ॒न्यः ।
श्रेया॑न् । उ॒त । **7 (50)**

**<u>TS 2.4.2.4</u>**

–ऽभ्रा॑तृ॒व्यो॒ यदिन्द्रा॑य वैमृ॒धा॑य॒ मृध॑ ए॒व तेना॑प ह॑त॒े यदिन्द्रा॑येन्द्रि॒या॑वत

इ॒न्द्रि॒यमे॒व तेना॒त्मन् ध॑त्ते॒ त्रय॑स्त्रिꣳशत्कपालं पु॒रोडा॒शं निर्व॑पति॒

त्रय॑स्त्रिꣳश॒द्–वै दे॒वता॒स्ता ए॒व यज॑मान आ॒त्मन्ननु॑ स॒मार॑ंभयते॒ भू॒त्यै॒

सा वा ए॒षा विजि॑ति॒र्नामे॒ष्टिर्य ए॒वं ँवि॒द्वाने॒तये॒ष्ट्या यज॑त उ॒त्तमा॒मेव

विजि॑तिं॒ भ्रातृ॑व्येण॒ वि ज॑यते ॥ **8**

**<u>TS 2.4.2.4 - Padam</u>**

अभ्रा॑तृव्यः । यत् । इन्द्रा॑य । वै॒मृ॒धा॑य । मृधः । ए॒व । ते॑न ।
अपे॑ति । ह॒ते॒ । यत् । इन्द्रा॑य । इ॒न्द्रि॒या॑व॒त इतीन्द्रि॒य – व॒ते॒ ।
इ॒न्द्रि॒यम् । ए॒व । ते॑न । आ॒त्मन्न् । ध॒त्ते॒ ।
त्रय॑स्त्रिꣳशत्कपा॒लमि॒ति त्रय॑स्त्रिꣳशत् – क॒पा॒ल॒म् । पु॒रो॒डाश॑म् ।

निरिति । वपति । त्रयस्त्रि॒ꣳशदिति त्रयः – त्रि॒ꣳशत् । वै ।
दे॒वताः । ताः । ए॒व । यजमानः । आ॒त्मन्न् । अन्विति ।
स॒मारंभयत इति सं – आरंभयते । भूत्यै । सा । वै । ए॒षा ।
विजितिरिति वि – जितिः । नाम । इष्टिः । यः । ए॒वम् । वि॒द्वान् ।
ए॒तया । इष्ट्या । यजते । उ॒त्तमामित्युत् – त॒माम् । ए॒व ।
विजितिमिति वि – जितिम् । भ्रातृव्येण । वीति । जयते ॥ **8 (49)**

***(इन्द्रियावती – भूत्या – उ॒तै – कान्नपञ्चाशच्च) (A2)***

**<u>TS 2.4.3.1</u>**

दे॒वा॒सु॒राः सँय॑त्ता आस॒न् तेषां गायत्र्योजो बलमिन्द्रि॒यं वीर्यं प्र॒जां
प॒शून्थ् सं॒गृह्या॒ऽऽदाया–प॒क्रम्याति॒ष्ठत् ते ऽमन्यन्त यत॒रान्
वा इ॒यमुपाव॒र्थ्स्यति त इ॒दं भविष्य॒न्तीति तां व्यह्वयन्त विश्वकर्म॒न्निति
दे॒वा दाभीत्यसु॒राः सा नान्यत॒रा–ꣳश्च॒नोपावर्त॒त ते दे॒वा
ए॒तद्–यजुरपश्य॒न्नोजो ऽसि॒ सहो ऽसि॒ बलमसि॒ – [ ] **9**

**<u>TS 2.4.3.1 - Padam</u>**

दे॒वा॒सु॒रा इति देव – अ॒सु॒राः । सँयत्ता॒ इति सं – य॒त्ता॒ः ।
आ॒स॒न्न् । तेषाम् । गा॒य॒त्री । ओजः । बलम् । इ॒न्द्रि॒यम् । वी॒र्यम् ।

प्रजामिति प्र – जाम् । पशून् । संगृह्येति सं – गृह्य ।
आदायेत्या – दाय । अपक्रम्येत्यप – क्रम्य । अतिष्ठत् । ते ।
अमन्यन्त । यतरान् । वै । इयम् । उपावर्थ्स्यतीत्युप – आवर्थ्स्यति ।
ते । इदम् । भविष्यन्ति । इति । ताम् । वीति । अह्वयन्त ।
विश्वकर्मन्निति विश्व – कर्मन्न् । इति । देवाः । दाभि । इति ।
असुराः । सा । न । अन्यतरान् । चन । उपावर्ततेत्युप – आवर्तत ।
ते । देवाः । एतत् । यजुः । अपश्यन्न् । ओजः । असि । सहः ।
असि । बलम् । असि । **9 (50)**

**<u>TS 2.4.3.2</u>**

भ्राजो ऽसि देवानां धाम नामा ऽसि विश्वमसि विश्वायुः सर्वमसि
सर्वायुरभिभूरिति वाव देवा असुराणामोजो बलमिन्द्रियं ँवीर्यं प्रजां
पशूनवृञ्जत यद्–गायत्र्यपक्रम्यातिष्ठत् तस्मादेतां गायत्रीतीष्टिमाहुः
सँवथ्सरो वै गायत्री सँवथ्सरो वै तदपक्रम्यातिष्ठद्–यदेतया
देवा असुराणामोजो बलमिन्द्रियं ँवीर्यं – [ ] **10**

**TS 2.4.3.2 - Padam**

भ्राजः । असि । देवानाम् । धाम । नाम । असि । विश्वम् । असि ।
विश्वायुरिति विश्व - आयुः । सर्वम् । असि । सर्वायुरिति
सर्व - आयुः । अभिभूरित्यभि - भूः । इति । वाव । देवाः ।
असुराणाम् । ओजः । बलम् । इन्द्रियम् । वीर्यम् ।
प्रजामिति प्र-जाम् । पशून् । अवृञ्जत । यत् । गायत्री ।
अपक्रम्येत्यप - क्रम्य । अतिष्ठत् । तस्मात् । एताम् । गायत्री । इति ।
इष्टिम् । आहुः । सँवथ्सर इति सं - वथ्सरः । वै । गायत्री ।
सँवथ्सर इति सं - वथ्सरः । वै । तत् । अपक्रम्येत्यप - क्रम्य ।
अतिष्ठत् । यत् । एतया । देवाः । असुराणाम् । ओजः । बलम् ।
इन्द्रियम् । वीर्यम् । **10 (50)**

**TS 2.4.3.3**

प्रजां पशूनवृञ्जत तस्मादेता७ँ सँवर्ग इतीष्टिमाहुर्यो
भ्रातृव्यवान्थ्स्याथ् सस्पर्द्धमान एतयेष्ट्या यजेताग्नये सँवर्गाय
पुरोडाशमष्टाकपालं निर्वपेत् त७ँ शृतमासन्नमेतेन यजुषा ऽभि

मृशेदोज एव बलमिन्द्रियं ँवीर्यं प्रजां पशून् भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना परा ऽस्य भ्रातृव्यो भवति ॥ **11**

**TS 2.4.3.3 - Padam**

प्रजामिति प्र – जाम् । पशून् । अवृञ्जत । तस्मात् । एताम् । सँवर्ग इति सं – वर्गः । इति । इष्टिम् । आहुः । यः । भ्रातृव्यवानिति भ्रातृव्य – वान् । स्यात् । सः । स्पर्द्धमानः । एतया । इष्ट्या । यजेत । अग्नये । सँवर्गायेति सं – वर्गाय । पुरोडाशम् । अष्टाकपालमित्यष्टा – कपालम् । निरिति । वपेत् । तम् । शृतम् । आसन्नमित्या – सन्नम् । एतेन । यजुषा । अभीति । मृशेत् । ओजः । एव । बलम् । इन्द्रियम् । वीर्यम् । प्रजामिति प्र – जाम् । पशून् । भ्रातृव्यस्य । वृङ्क्ते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति ॥ **11 (45)**

*(बलमस्ये – तया देवा असुराणामोजो बलमिन्द्रियं ँवीर्य – पञ्चचत्वारिँ॒शच्च) (A3)*

**TS 2.4.4.1**

प्रजापतिः प्रजा असृजत ता अस्माथ् सृष्टाः पराची–रायन् ता

यत्रावसन् ततो गर्मुदुदतिष्ठत् ता बृहस्पतिश्चान्ववैता॒ऽ सो ऽब्रवीद्

बृहस्पतिरनया त्वा प्र तिष्ठान्यथ त्वा प्रजा उपावथ्स्र्यन्तीति तं प्रातिष्ठत्

ततो वै प्रजापतिं प्रजा उपावर्तन्त यः प्रजाकामः स्यात् तस्मा एतं

प्राजापत्यं गार्मुतं चरुं निर्वपेत् प्रजापति – [ ] **12**

**TS 2.4.4.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र–जाः । असृजत । ताः ।

अस्मात् । सृष्टाः । पराचीः । आयन्न् । ताः । यत्र । अवसन्न् । ततः ।

गर्मुत् । उदिति । अतिष्ठत् । ताः । बृहस्पतिः । च ।

अन्ववैतामित्यनु – अवैताम् । सः । अब्रवीत् । बृहस्पतिः । अनया ।

त्वा । प्रेति । तिष्ठानि । अथ । त्वा । प्रजा इति प्र – जाः ।

उपावथ्स्र्यन्तीत्युप – आवथ्स्र्यन्ति । इति । तम् । प्रेति । अतिष्ठत् ।

ततः । वै । प्रजापतिमिति प्रजा – पतिम् । प्रजा इति प्र – जाः ।

उपावर्तन्तेत्युप – आवर्तन्त । यः । प्रजाकाम इति प्रजा – कामः ।

स्यात् । तस्मै । एतम् । प्राजापत्यमिति प्राजा – पत्यम् । गार्मुतम् ।

चरुम् । निरिति । वपेत् । प्रजापतिमिति प्रजा – पतिम् । **12 (50)**

**TS 2.4.4.2**

–मेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां प्र जनयति

प्रजापतिः पशूनसृजत ते ऽस्माथ् सृष्टाः पराञ्च आयन् ते यत्रावसन्

ततो गर्मुदुदतिष्ठत् तान् पूषा चान्ववैता७ सो ऽब्रवीत् पूषा ऽनया मा

प्र तिष्ठाथ त्वा पशव उपावथ्स्र्यन्तीति मां प्र तिष्ठेति सोमो ऽब्रवीन्

मम वा – [ ] **13**

**TS 2.4.4.2 - Padam**

एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति ।

सः । एव । अस्मै । प्रजामिति प्र – जाम् । प्रेति । जनयति ।

प्रजापतिरिति प्रजा – पतिः । पशून् । असृजत । ते । अस्मात् ।

सृष्टाः । पराञ्चः । आयन्न् । ते । यत्र । अवसन्न् । ततः । गर्मुत् ।

उदिति । अतिष्ठत् । तान् । पूषा । च । अन्ववैतामित्यनु – अवैताम् ।

सः । अब्रवीत् । पूषा । अनया । मा । प्रेति । तिष्ठ । अथ । त्वा ।

पशवः । उपावर्थ्स्यन्तीत्युप - आवर्थ्स्यन्ति । इति । माम् । प्रेति ।
तिष्ठ । इति । सोमः । अब्रवीत् । मम । वै । **13 (50)**

**TS 2.4.4.3**

अकृष्टपच्यमित्युभौ वां प्र तिष्ठानीत्यब्रवीत् तौ प्रातिष्ठत् ततो वै
प्रजापतिं पशव उपावर्तन्त यः पशुकामः स्यात् तस्मा एतꣳ
सोमापौष्णं गार्मुतं चरुं निर्वपेथ् सोमापूषणावेव स्वेन भागधेयेनोप
धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां
प्रजनयिता सोम एवास्मै रेतो दधाति पूषा ( ) पशून् प्रजनयति ॥ **14**

**TS 2.4.4.3 - Padam**

अकृष्टपच्यमित्यकृष्ट - पच्यम् । इति । उभौ । वाम् । प्रेति ।
तिष्ठानि । इति । अब्रवीत् । तौ । प्रेति । अतिष्ठत् । ततः । वै ।
प्रजापतिमिति प्रजा - पतिम् । पशवः । उपावर्तन्तेत्युप-आवर्तन्त ।
यः । पशुकाम इति पशु - कामः । स्यात् । तस्मै । एतम् ।
सोमापौष्णमिति सोमा - पौष्णम् । गार्मुतम् । चरुम् । निरिति ।
वपेत् । सोमापूषणाविति सोमा - पूषणौ । एव । स्वेन ।
भागधेयेनेति भाग- धेयेन । उपेति । धावति । तौ । एव । अस्मै ।

पशून् । प्रेति । जनयतः । सोमः । वै । रेतोधा इति रेतः – धाः ।

पूषा । पशूनाम् । प्रजनयितेति प्र – जनयिता । सोमः । एव ।

अस्मै । रेतः । दधाति । पूषा ( ) । पशून् । प्रेति ।

जनयति ॥ **14 (53)**

*(वपेत् प्रजापतिं – वैं – दधाति पूषा – त्रीणि च) (A4)*

**TS 2.4.5.1**

अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः ।

इन्द्रो धर्ता गृहेषु नः ॥

सविता यः सहस्रियः स नो गृहेषु रारणत् ।

आ पूषा एत्वाऽऽ वसु ॥

धाता ददातु नो रयिमीशानो जगतस्पतिः ।

स नः पूर्णेन वावनत् ॥

त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् ।

सहस्रेणायुतेन च ॥

येन देवा अमृतं – [ ] **15**

**TS 2.4.5.1 - Padam**

अग्ने । गोभिः । नः । एति । गहि । इन्दो इति । पुष्ट्या । जुषस्व ।

नः ॥ इन्द्रः । धर्ता । गृहेषु । नः ॥ सविता । यः । सहस्रियः ।

सः । नः । गृहेषु । रारणत् ॥ एति । पूषा । एतु । एति । वसु ॥

धाता । ददातु । नः । रयिम् । ईशानः । जगतः । पतिः ॥ सः । नः ।

पूर्णेन । वावनत् ॥ त्वष्टा । यः । वृषभः । वृषा । सः । नः । गृहेषु ।

रारणत् ॥ सहस्रेण । अयुतेन । च । येन । देवाः । अमृतम् । **15 (50)**

**TS 2.4.5.2**

दीर्घ౦ श्रवो दिव्यैरयन्त ।

रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व ॥

अग्नि र्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा ॥

अग्ने गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि

श्रैष्ठ्यात्पथो मा योषं मूर्द्धा भूयास౦ स्वाहा ॥ **16**

**TS 2.4.5.2 - Padam**

दीर्घम् । श्रवः । दिवि । ऐरयन्त ॥ रायः । पोष । त्वम् ।

अस्मभ्यमित्यस्म – भ्यम् । गवाम् । कुल्मिम् । जीवसे । एति ।

युवस्व ॥ अग्निः । गृहपतिरिति गृह - पतिः । सोमः । विश्वविनिरिति विश्व - वनिः । सविता । सुमेधा इति सु-मेधाः । स्वाहा ॥ अग्ने । गृहपत इति गृह - पते । यः । ते । घृत्यः । भागः । तेन । सहः । ओजः । आक्रममाणायेत्या-क्रममाणाय । धेहि । श्रैष्ठ्यात् । पथः । मा । योषम् । मूर्द्धा । भूयासम् । स्वाहा ॥ **16 (38)**

*(अमृत - मष्टात्रिंशच्च) (A5)*

**TS 2.4.6.1**

चित्रया यजेत पशुकाम इयं वै चित्रा यद्-वा अस्यां विश्वं भूतमधि प्रजायते तेनेयञ्चित्रा य एवं विद्वाꣳ श्चित्रया पशुकामो यजते प्र प्रजया पशुभि र्मिथुनै र्जायते प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोतिसारस्वतौ भवत एतद्-वै दैव्यं मिथुनं दैव्यमेवास्मै - [ ] **17**

**TS 2.4.6.1 - Padam**

चित्रया । यजेत । पशुकाम इति पशु - कामः । इयम् । वै । चित्रा । यत् । वै । अस्याम् । विश्वम् । भूतम् । अधीति । प्रजायत इति प्र - जायते । तेन । इयम् । चित्रा । यः । एवम् ।

विद्वान् । चित्रया । पशुकाम इति पशु – कामः । यजते । प्रेति ।
प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । मिथुनैः । जायते ।
प्रेति । एव । आग्नेयेन । वापयति । रेतः । सौम्येन । दधाति । रेतः ।
एव । हितम् । त्वष्टा । रूपाणि । वीति । करोति । सारस्वतौ ।
भवतः । एतत् । वै । दैव्यम् । मिथुनम् । दैव्यम् । एव ।
अस्मै । **17 (50)**

**TS 2.4.6.2**

मिथुनं मद्ध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक्पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनꣳ सप्तैतानि हवीꣳषि भवन्ति सप्त ग्राम्याः पशवः सप्तारण्याः सप्त छन्दाꣳस्युभयस्या–वरुद्ध्या अथैता आहुती र्जुहोत्येते वै देवाः पुष्टिपतयस्त एवा ( ) स्मिन् पुष्टिं दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै ॥ **18**

**TS 2.4.6.2 - Padam**

मिथुनम् । मद्ध्यतः । दधाति । पुष्ट्यै । प्रजननायेति प्र – जननाय ।
सिनीवाल्यै । चरुः । भवति । वाक् । वै । सिनीवाली । पुष्टिः ।

खलु । वै । वाक् । पुष्टिम् । एव । वाचम् । उपेति । एति । ऐन्द्रः ।

उत्तम इत्युत् – तमः । भवति । तेन । एव । तत् । मिथुनम् । सप्त ।

एतानि । हवीꣳषि । भवन्ति । सप्त । ग्राम्याः । पशवः । सप्त ।

आरण्याः । सप्त । छन्दाꣳसि । उभयस्य । अवरुद्ध्या

इत्यव – रुद्ध्यै । अथ । एताः । आहुतीरित्या – हुतीः ।

जुहोति । एते । वै । देवाः । पुष्टिपतय इति पुष्टि – पतयः ।

ते । एव ( ) । अस्मिन्न् । पुष्टिम् । दधति । पुष्यति । प्रजयेति

प्र – जया । पशुभिरिति पशु – भिः । अथो इति । यत् । एताः ।

आहुतीरित्या – हुतीः । जुहोति । प्रतिष्ठित्या इति

प्रति – स्थित्यै ॥ **18 (62)** ***(अस्मै – त एव – द्वादश च) (A6)***

**TS 2.4.7.1**

मारुतमसि मरुतामोजो ऽपां धारां भिन्धि रमयत मरुतः श्येनमायिनं

मनोजवसं ँवृषणꣳ सुवृक्तिं ॥

येन शर्द्ध उग्रमवसृष्टमेति तदश्विना परि धत्तꣲ स्वस्ति ।

पुरोवातो वर्.षञ्जिन्वरावृथ्–स्वाहा वातावद्–वर्.षन्नुग्रावृथ् स्वाहा

स्तनयन् वर्.षन् भीमरावथ्स्वाहा ऽनशन्यवस्फूर्जन्–दिद्युद्–वर्.षन्–
त्वेषरावृथ् स्वाहा ऽतिरात्रंँ वर्.षन् पूर्तिरावृथ् – [ ] **19**

**TS 2.4.7.1 - Padam**

मारुतम् । असि । मरुताम् । ओजः । अपाम् । धाराम् । भिन्धि ।
रमयत । मरुतः । श्येनम् । आयिनम् । मनोजवसमिति
मनः – जवसम् । वृषणम् । सुवृक्तिमिति सु – वृक्तिम् ॥
येन । शर्द्धः । उग्रम् । अवसृष्टमित्यव – सृष्टम् । एति । तत् ।
अश्विना । परीति । धत्तम् । स्वस्ति ॥ पुरोवात इति पुरः – वातः ।
वर्.षन्न् । जिन्वः । आवृदित्या – वृत् । स्वाहा ।
वातावदिति वात – वत् । वर्.षन्न् । उग्रः । आवृदित्या – वृत् ।
स्वाहा । स्तनयन्न् । वर्.षन्न् । भीमः । आवृदित्या – वृत् । स्वाहा ।
अनशनि । अवस्फूर्जन्नित्यव–स्फूर्जन्न् । दिद्युत् । वर्.षन्न् । त्वेषः ।
आवृदित्या – वृत् । स्वाहा । अतिरात्रमित्यति – रात्रम् ।
वर्.षन्न् । पूर्तिः । आवृदित्या – वृत् । **19 (50)**

**TS 2.4.7.2**

स्वाहा बहु हायमवृषादिति श्रुतरावृथ् स्वाहा ऽऽतपति वर्.षन्-

विराडावृथ् स्वाहा ऽवस्फूर्जन्-दिद्युद्-वर्.षन् भूतरावृथ् स्वाहामान्दा

वाशाः शुन्ध्यूरजिराः ।

ज्योतिष्मती-स्तमस्वरी-रुन्दतीः सुफेनाः ।

मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह मा ऽवत ॥

वृष्णो अश्वस्य सन्दानमसि वृष्ट्यै त्वोप नह्यामि ॥ **20**

**TS 2.4.7.2 - Padam**

स्वाहा । बहु । ह । अयम् । अवृषात् । इति । श्रुतः ।

आवृदित्या - वृत् । स्वाहा । आतपतीत्या - तपति । वर्.षन्न् ।

विराडिति वि - राट् । आवृदित्या - वृत् । स्वाहा ।

अवस्फूर्जन्नित्यव - स्फूर्जन्न् । दिद्युद् । वर्.षन्न् । भूतः ।

आवृदित्या - वृत् । स्वाहा । मान्दाः । वाशाः । शुन्ध्यूः । अजिराः ॥

ज्योतिष्मतीः । तमस्वरीः । उन्दतीः । सुफेना इति सु - फेनाः ॥

मित्रभृत इति मित्र - भृतः । क्षत्रभृत इति क्षत्र - भृतः ।

सुराष्ट्रा इति सु - राष्ट्राः । इह । मा । अवत ॥ वृष्णः । अश्वस्य ।

सन्दानमिति सं – दानम् । असि । वृष्ट्यै । त्वा । उपेति ।

नह्यामि ॥ **20 (42)** *(पूर्तिरावृद् – द्विचत्वारिꣳशच्च) (A7)*

**TS 2.4.8.1**

देवा वसव्या अग्ने सोम सूर्य ॥

देवाः शर्मण्या मित्रावरुणा ऽर्यमन्न् ॥

देवाः सपीतयो ऽपां नपादाशुहेमन्न् ।

उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो

नो वृष्ट्या ऽवत ॥

दिवा चित्तमः कृण्वन्ति पर्जन्येनो–दवाहेन ।

पृथिवीं ँयद् व्युन्दन्ति ॥

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।

वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति – [ ] **21**

**TS 2.4.8.1 - Padam**

देवाः । वसव्याः । अग्ने । सोम । सूर्य ॥ देवाः । शर्मण्याः ।

मित्रावरुणेति मित्रा – वरुणा । अर्यमन्न् ॥ देवाः ।

सपीतय इति स – पीतयः । अपाम् । नपात् ।

आशुहेमन्नित्याशु – हेमन्न् ॥ उद्नः । दत्त । उदधिमित्युद – धिम् ।
भिन्त । दिवः । पर्जन्यात् । अन्तरिक्षात् । पृथिव्याः । ततः । नः ।
वृष्ट्या । अवत ॥ दिवा । चित् । तमः । कृण्वन्ति । पर्जन्येन ।
उदवाहेनेत्युद – वाहेन ॥ पृथिवीम् । यत् । व्युन्दन्तीति वि–उन्दन्ति ॥
एति । यम् । नरः । सुदानव इति सु–दानवः । ददाशुषे । दिवः ।
कोशम् । अचुच्यवुः ॥ वीति । पर्जन्याः । सृजन्ति । रोदसी इति ।
अन्विति । धन्वना । यन्ति । **21 (50)**

**TS 2.4.8.2**

वृष्टयः ॥

**उदीरयथा** मरुतः समुद्रतो यूयं ँवृष्टिं **ँवर्.षयथा** पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं ँयातामनु रथा अवृथ्सत ॥
**सृजा** वृष्टिं दिव आ ऽद्भिः समुद्रं पृण ॥
अब्जा असि प्रथमजा बलमसि समुद्रियं ॥
उन्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः ।
उद्नो दिव्यस्य नो देहीशानो वि **सृजा** दृतिं ॥

ये देवा ( ) दिविभागा ये ऽन्तरिक्षभागा ये पृथिविभागाः ।
त इमं यँज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु
वि विशन्तु ॥ 22

**TS 2.4.8.2 - Padam**

वृष्टयः ॥ उदिति । ईरयथ । मरुतः । समुद्रतः । यूयम् । वृष्टिम् ।
वर्.षयथ । पुरीषिणः ॥ न । वः । दस्राः । उपेति । दस्यन्ति ।
धेनवः । शुभम् । याताम् । अन्विति । रथाः । अवृथ्सत ॥ सृज ।
वृष्टिम् । दिवः । एति । अद्भिरित्यत् – भिः । समुद्रम् । पृण ॥
अब्जा इत्यप् – जाः । असि । प्रथमजा इति प्रथम – जाः ।
बलम् । असि । समुद्रियम् ॥ उदिति । नंभय । पृथिवीम् । भिन्धि ।
इदम् । दिव्यम् । नभः ॥ उद्नः । दिव्यस्य । नः । देहि । ईशानः ।
वीति । सृज । दृतिम् ॥ ये । देवाः ( ) । दिविभागा इति
दिवि – भागाः । ये । अन्तरिक्षभागा इत्यन्तरिक्ष – भागाः । ये ।
पृथिविभागा इति पृथिवि – भागाः ॥ ते । इमम् । यज्ञम् । अवन्तु ।

ते । इदम् । क्षेत्रम् । एति । विशन्तु । ते । इदम् । क्षेत्रम् । अनु ।
वीति । विशन्तु ॥ **22 (70)** *(यन्ति – देवा – विꣳशतिश्च) (A8)*

**TS 2.4.9.1**

मारुतमसि मरुतामोज इति कृष्णं ँवासः कृष्णतूषं परि धत्त एतद्–वै
वृष्ट्यै रूपꣳ सरूप एव भूत्वा पर्जन्यं ँवर्.षयतिरमयत मरुतः
श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति
वर्.षस्यावरुद्ध्यै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव
स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं ँवर्.षयत्यष्टौ – [ ] **23**

**TS 2.4.9.1 - Padam**

मारुतम् । असि । मरुताम् । ओजः । इति । कृष्णम् । वासः ।
कृष्णतूषमिति कृष्ण – तूषम् । परीति । धत्ते । एतत् । वै । वृष्ट्यै ।
रूपम् । सरूप इति स – रूपः । एव । भूत्वा । पर्जन्यम् ।
वर्.षयति । रमयत । मरुतः । श्येनम् । आयिनम् । इति ।
पश्चाद्वातमिति पश्चात् – वातम् । प्रतीति । मीवति ।
पुरोवातमिति पुरः – वातम् । एव । जनयति । वर्.षस्य ।
अवरुद्ध्या इत्यव – रुद्ध्यै । वातनामानीति वात – नामानि ।

जुहोति । वायुः । वै । वृष्ट्याः । ईशे । वायुम् । एव । स्वेन ।
भागधेयेनेति भाग– धेयेन । उपेति । धावति । सः । एव । अस्मै ।
पर्जन्यम् । वर्.षयति । अष्टौ । **23 (50)**

**TS 2.4.9.2**

जुहोति चतस्रो वै दिशश्चतस्रो ऽवान्तरदिशा दिग्भ्य एव वृष्टिꣳ
सं प्र च्यावयति कृष्णाजिने सं ँयौति हविरेवाकरन्तर्वेदि सं
ँयौत्यवरुद्ध्यै यतीनामद्यमानानाꣳ शीर्.षाणि परा ऽपतन्ते खर्जूरा
अभवन् तेषाꣳ रस ऊर्द्ध्वो ऽपतत् तानि करीराण्यभवन्थ् सौम्यानि
वै करीराणि सौम्या खलु वा आहुति र्दिवो वृष्टिं च्यावयति
यत्करीराणि भवन्ति – [ ] **24**

**TS 2.4.9.2 - Padam**

जुहोति । चतस्रः । वै । दिशः । चतस्रः । अवान्तरदिशा
इत्यवान्तर – दिशाः । दिग्भ्य इति दिक् – भ्यः । एव । वृष्टिम् ।
सम् । प्रेति । च्यावयति । कृष्णाजिन इति कृष्ण–अजिने । समिति ।
यौति । हविः । एव । अकः । अन्तर्वेदीत्यन्तः – वेदि । समिति ।
यौति । अवरुद्ध्या इत्यव – रुद्ध्यै । यतीनाम् । अद्यमानानाम् ।

शीर्.षाणि । परेति । अपतन्न् । ते । खर्जूराः । अभवन्न् । तेषाम् । रसः । ऊर्द्ध्वः । अपतत् । तानि । करीराणि । अभवन्न् । सौम्यानि । वै । करीराणि । सौम्या । खलु । वै । आहुतिरित्या – हुतिः । दिवः । वृष्टिम् । च्यावयति । यत् । करीराणि । भवन्ति । **24 (50)**

**<u>TS 2.4.9.3</u>**

सौम्ययैवाऽऽहुत्या दिवो वृष्टिमव रुन्धे मधुषा सं ँयौत्यपां ँवा एष ओषधीना९ँ रसो यन्मद्ध्वद्भ्य एवौषधीभ्यो वर्.षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिंनि नयति मान्दा वाशा इति सं ँयौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसा वेहीत्येवमेवैना नामधेयैरा – [ ] **25**

**<u>TS 2.4.9.3 - Padam</u>**

सौम्यया । एव । आहुत्येत्या – हुत्या । दिवः । वृष्टिम् । अवेति । रुन्धे । मधुषा । समिति । यौति । अपाम् । वै । एषः । ओषधीनाम् । रसः । यत् । मधु । अद्भ्य इत्यत् – भ्यः । एव । ओषधीभ्य इत्योषधि – भ्यः । वर्.षति । अथो इति । अद्भ्य इत्यत् – भ्यः । एव । ओषधीभ्य इत्योषधि – भ्यः । वृष्टिम् । नीति । नयति । मान्दाः । वाशाः । इति । समिति । यौति । नामधेयैरिति नाम–धेयैः ।

एव । एनाः । अच्छ । एति । अथो इति । यथा । ब्रूयात् । असौ ।

एति । इहि । इति । एवम् । एव । एनाः । नामधेयैरिति नाम–धेयैः ।

एति । **25 (50)**

**TS 2.4.9.4**

च्यावयति वृष्णो अश्वस्य सन्दानमसि वृष्ट्यै त्वोप नह्यामीत्याह

वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्.षति

रूपेणैवैनꣳ समर्द्धयति वर्.षस्यावरुद्ध्यै ॥ **26**

**TS 2.4.9.4 - Padam**

च्यावयति । वृष्णः । अश्वस्य । सन्दानमिति सं – दानम् ।

असि । वृष्ट्यै । त्वा । उपेति । नह्यामि । इति । आह । वृषा । वै ।

अश्वः । वृषा । पर्जन्यः । कृष्णः । इव । खलु । वै । भूत्वा ।

वर्.षति । रूपेण । एव । एनम् । समिति । अर्द्धयति ।

वर्.षस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ॥ **26 (29)**

*(अष्टौ – भवन्ति – नामधेयैरै – कान्त्रिꣳशच्च) (A9)*

**TS 2.4.10.1**

देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बद्ध्नाति

देवताभिरेवान्वहं वृष्टिमिच्छति यदि वर्.षेत् तावत्येव होतव्यं ँयदि

न वर्.षेच्छ्वो भूते हविर्निर्वपेदहोरात्रे वै मित्रावरुणावहोरात्राभ्यां

खलु वै पर्जन्यो वर्.षति नक्तं ँवा हि दिवा वा वर्.षति मित्रावरुणावेव

स्वेन भागधेयेनोप धावति तावेवास्मा – [ ] **27**

**TS 2.4.10.1 - Padam**

देवाः । वसव्याः । देवाः । शर्मण्याः । देवाः । सपीतय इति

स – पीतयः । इति । एति । बद्ध्नाति । देवताभिः । एव ।

अन्वहमित्यनु – अहम् । वृष्टिम् । इच्छति । यदि । वर्.षेत् ।

तावति । एव । होतव्यम् । यदि । न । वर्.षेत् । श्वः । भूते । हविः ।

निरिति । वपेत् । अहोरात्रे इत्यहः – रात्रे । वै । मित्रावरुणाविति

मित्रा – वरुणौ । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । खलु । वै ।

पर्जन्यः । वर्.षति । नक्तम् । वा । हि । दिवा । वा । वर्.षति ।

मित्रावरुणाविति मित्रा – वरुणौ । एव । स्वेन । भागधेयेनेति

भाग – धेयेन । उपेति । धावति । तौ । एव । अस्मै । **27 (50)**

**TS 2.4.10.2**

अहोरात्राभ्यां पर्जन्यं ँवर्.षयतो ऽग्नये धामच्छदे पुरोडाशमष्टाकपालं

निर्वपेन्मारुत७ं सप्तकपाल७ं सौर्यमेककपालमग्निर्वा इतो

वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो

न्यङ् रश्मिभिः पर्यावर्तते ऽथवर्.षतिधामच्छदिव खलु वै भूत्वा

वर्.षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप

धावति ता - [ ] **28**

**TS 2.4.10.2 - Padam**

अहोरात्राभ्यामित्यहः-रात्राभ्याम् । पर्जन्यम् । वर्.षयतः । अग्नये ।

धामच्छद इति धाम - छदे । पुरोडाशम् ।

अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेत् । मारुतम् ।

सप्तकपालमिति सप्त - कपालम् । सौर्यम् ।

एककपालमित्येक - कपालम् । अग्निः । वै । इतः । वृष्टिम् ।

उदिति । ईरयति । मरुतः । सृष्टाम् । नयन्ति । यदा । खलु । वै ।

असौ । आदित्यः । न्यङ् । रश्मिभिरिति रश्मि - भिः ।

पर्यावर्तत इति परि - आवर्तते । अथ । वर्.षति ।

धामच्छदिति धाम - छत् । इव । खलु । वै । भूत्वा । वर्.षति ।
एताः । वै । देवताः । वृष्ट्याः । ईशते । ताः । एव । स्वेन ।
भागधेयेनेति भाग - धेयेन । उपेति । धावति । ताः । **28 (50)**

**TS 2.4.10.3**

एवास्मै पर्जन्यं ँवर्.षयन्त्युतावर्.षिष्यन् वर्.षत्येव सृजा वृष्टिं दिव आ ऽद्भिः समुद्रं पृणेत्याहेमाश्चैवामूश्चापः समर्द्धयत्यथो आभिरेवा- मूरच्छैत्यब्जा असि प्रथमजा बलमसि समुद्रियमित्याह यथायजुरेवैतदुन्नं भय पृथिवीमिति वर्.षाह्वां जुहोत्येषा वा ( ) ओषधीनां ँवृष्टिवनिस्तयैव वृष्टिमा च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ॥ **29**

**TS 2.4.10.3 - Padam**

एव । अस्मै । पर्जन्यम् । वर्.षयन्ति । उत । अवर्.षिष्यन्न् ।
वर्.षति । एव । **सृज** । वृष्टिम् । दिवः । एति । अद्भिरित्यत् - भिः ।
समुद्रम् । पृण । इति । आह । इमाः । च । एव । अमूः । च ।
अपः । समिति । अर्द्धयति । अथो इति । आभिः । एव । अमूः ।
अच्छ । एति । अब्जा इत्यप् - जाः । असि ।

प्रथमजा इति प्रथम - जाः । बलम् । असि । समुद्रियम् । इति ।
आह । यथायजुरिति यथा - यजुः । एव । एतत् । उदिति । नंभय ।
पृथिवीम् । इति । वर्.षाह्वामिति वर्.ष - ह्वाम् । जुहोति । एषा ।
वै ( ) । ओषधीनाम् । वृष्टिवनिरिति वृष्टि - वनिः । तया । एव ।
वृष्टिम् । एति । च्यावयति । ये । देवाः । दिविभागा इति
दिवि - भागाः । इति । कृष्णाजिनमिति कृष्ण - अजिनम् ।
अवेति । धूनोति । इमे । एव । अस्मै । लोकाः । प्रीताः ।
अभीष्टा इत्यभि - इष्टाः । भवन्ति ॥ **29 (71)**

*(अस्मै - धावति ता - वा - एकवि॰शतिश्च ) (A10)*

**TS 2.4.11.1**

सर्वाणि छन्दा॰स्येतस्या-मिष्ट्या-मनूच्यानीत्याहु-स्त्रिष्टुभो वा
एतद्वीर्यँ यत् ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह
तेनैव सर्वाणि छन्दा॰स्यव रुन्धे गायत्री वा एषा यदुष्णिहा
यानि चत्वार्यद्ध्यक्षराणि चतुष्पाद एव ते पशवोयथा पुरोडाशे
पुरोडाशो ऽद्ध्येवमेव तद्-यद्-ऋच्यद्ध्यक्षराणि यज्जगत्या- [ ] **30**

**TS 2.4.11.1 - Padam**

सर्वाणि । छन्दा॑ꣳसि । एतस्याम् । इष्ट्याम् ।

अनूच्यानीत्यनु – उच्यानि । इति । आहुः । त्रिष्टुभः । वै । एतत् ।

वीर्यम् । यत् । ककुत् । उष्णिहा । जगत्यै । यत् ।

उष्णिहककुभावित्युष्णिह – ककुभौ । अन्वाहेत्यनु – आह । तेन ।

एव । सर्वाणि । छन्दा॑ꣳसि । अवेति । रुन्धे । गायत्री । वै । एषा ।

यत् । उष्णिहा । यानि । चत्वारि । अधीति । अक्षराणि । चतुष्पाद

इति चतुः – पादः । एव । ते । पशवः । यथा । पुरोडाशे ।

पुरोडाशः । अधीति । एवम् । एव । तत् । यत् । ऋचि । अधीति ।

अक्षराणि । यत् । जगत्या । **30 (50)**

**TS 2.4.11.2**

परिदद्ध्यादन्तं ँयज्ञं गमयेत् त्रिष्टुभा परि दधातीन्द्रियं ँवै वीर्यं

त्रिष्टुगिन्द्रिय एव वीर्ये यज्ञं प्रति ष्ठापयति नान्तं गमयत्यग्ने त्री ते

वाजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय सर्वो वा एष

यज्ञो यत् त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो

यज्ञः प्रयुज्यते त्रैधातवीयेन यजेताभिचरन्थ् सर्वो वा– [ ] **31**

**TS 2.4.11.2 - Padam**

परिदद्ध्यादिति परि–दद्ध्यात् । अन्तम् । यज्ञम् । गमयेत् । त्रिष्टुभा । परीति । दधाति । इन्द्रियम् । वै । वीर्यम् । त्रिष्टुक् । इन्द्रिये । एव । वीर्ये । यज्ञम् । प्रतीति । स्थापयति । न । अन्तम् । गमयति । अग्ने । त्री । ते । वाजिना । त्री । सधस्थेति सध – स्था । इति । त्रिवत्येति त्रि – वत्या । परीति । दधाति । सरूपत्वायेति सरूप – त्वाय । सर्वः । वै । एषः । यज्ञः । यत् । त्रैधातवीयम् । कामायकामायेति कामाय – कामाय । प्रेति । युज्यते । सर्वेभ्यः । हि । कामेभ्यः । यज्ञः । प्रयुज्यत इति प्र – युज्यते । त्रैधातवीयेन । यजेत । अभिचरन्नित्यभि – चरन्न् । सर्वः । वै । **31 (50)**

**TS 2.4.11.3**

एष यज्ञो यत् त्रैधातवीय᳚ सर्वेणैवैनं᳚ यज्ञेनाभि चरति स्तृणुत एवैनमेतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो यत् त्रैधातवीय᳚ सर्वेणैव यज्ञेन यजते नैनमभिचरन्थ् स्तृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्–ददात्येतयैव यजेत सहस्रेणेजानो ऽन्तं᳚ वा एष पशूनां गच्छति – [ ] **32**

**TS 2.4.11.3 - Padam**

एषः । यज्ञः । यत् । त्रैधातवीयम् । सर्वेण । एव । एनम् । यज्ञेन ।
अभीति । चरति । स्तृणुते । एव । एनम् । एतया । एव । यजेत ।
अभिचर्यमाण इत्यभि–चर्यमाणः । सर्वः । वै । एषः । यज्ञः । यत् ।
त्रैधातवीयम् । सर्वेण । एव । यज्ञेन । यजते । न । एनम् ।
अभिचरन्नित्यभि – चरन्न् । स्तृणुते । एतया । एव । यजेत ।
सहस्रेण । यक्ष्यमाणः । प्रजातमिति प्र – जातम् । एव । एनत् ।
ददाति । एतया । एव । यजेत । सहस्रेण । ईजानः । अन्तम् । वै ।
एषः । पशूनाम् । गच्छति । **32 (50)**

**TS 2.4.11.4**

यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ता७ स्त्रैधातवीये–
नैवासृजत य एवं ँविद्वा७ स्त्रैधातवीयेनपशुकामो यजते यस्मादेव
योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्थ् सृजत उपैनमुत्तर८्
सहस्रं नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न
यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो – [ ] **33**

**TS 2.4.11.4 - Padam**

यः । स॒ह॒स्रेण॑ । यज॑ते । प्र॒जाप॑ति॒रिति॑ प्र॒जा – प॒ति॒ः । खलु॑ । वै ।

प॒शून् । अ॒सृ॒ज॒त । तान् । त्रै॒धा॒त॒वीये॑न । ए॒व । अ॒सृ॒ज॒त ।

यः । ए॒वम् । वि॒द्वान् । त्रै॒धा॒त॒वीये॑न । प॒शुका॑म॒ इति॑ प॒शु – का॒म॒ः ।

यज॑ते । यस्मा॓त् । ए॒व । योने॓ः । प्र॒जाप॑ति॒रिति॑ प्र॒जा–प॒ति॒ः । प॒शून् ।

असृ॑जत । तस्मा॓त् । ए॒व । ए॒ना॒न् । सृ॒ज॒ते । उपे॑ति । ए॒न॒म् ।

उत्त॑र॒मित्यु॑त् – त॒र॒म् । स॒ह॒स्र॓म् । न॒म॒ति॒ । दे॒वता॓भ्यः । वै । ए॒षः ।

एति॑ । वृ॒श्च्य॒ते॒ । यः । य॒क्ष्ये॑ । इति॑ । उ॒क्त्वा । न । यज॑ते ।

त्रै॒धा॒त॒वीये॑न । य॒जे॒त॒ । सर्वः॑ । वै । ए॒षः । य॒ज्ञः । **33 (50)**

**TS 2.4.11.5**

यत् त्रैधा॑तवी॒य॒ं॒ सर्वे॑णै॒व य॒ज्ञेन॑ यज॒ते न दे॒वता॓भ्य॒ आ वृ॑श्च्य॒ते

द्वाद॑शकपालः पु॒रोडा॑शो भव॒ति॒ ते त्र॒यश्च॑तुष्कपाला–स्त्रिषमृ॒द्धत्वा॒य

त्र॑यः पु॒रोडा॑शा भव॒न्ति॒ त्रय॑ इ॒मे लो॒का ए॒षां ँ॒लो॒का॒नामाप्त्या॒

उत्त॑रउत्त॒रो ज्याया॓न् भवत्ये॒वमि॒व हीमे लो॒का यव॑म॒यो॒ मद्ध्य ए॒तद्–वा

अ॒न्तरि॑क्षस्य रू॒पं॒ सम॑द्ध्यै॒ सर्वे॑षामभि॒ग॒म॒यन्नव॑ द्य॒त्यछं॑बट्का॒र॒ं॒

हिर॑ण्यं ददा॒ति॒ तेज॑ ए॒वा – [ ] **34**

**TS 2.4.11.5 - Padam**

यत् । त्रैधातवीयम् । सर्वेण । एव । यज्ञेन । यजते । न ।

देवताभ्यः । एति । वृश्च्यते । द्वादशकपाल इति द्वादश–कपालः ।

पुरोडाशः । भवति । ते । त्रयः । चतुष्कपाला इति चतुः–कपालाः ।

त्रिषमृद्धत्वायेति त्रिषमृद्ध – त्वाय । त्रयः । पुरोडाशाः ।

भवन्ति । त्रयः । इमे । लोकाः । एषाम् । लोकानाम् । आप्त्यै ।

उत्तरउत्तर इत्युत्तरः –उत्तरः । ज्यायान् । भवति । एवम् । इव । हि ।

इमे । लोकाः । यवमय इति यव – मयः । मद्ध्ये । एतत् । वै ।

अन्तरिक्षस्य । रूपम् । समृद्ध्या इति सं – ऋद्ध्यै । सर्वेषाम् ।

अभिगमयन्नित्यभि – गमयन्न् । अवेति । द्यति ।

अछंबट्कारमित्यछंबट् – कारम् । हिरण्यम् । ददाति ।

तेजः । एव । **34 (50)**

**TS 2.4.11.6**

ऽव रुन्धे ताप्र्यं ददाति पशूनेवाव रुन्धे धेनुं ददात्याशिष

एवाव रुन्धे साम्नो वा एष वर्णो यद्धिरण्यं ँयजुषां ताप्र्यमुक्थामदानां

धेनुरेतानेव सर्वान्. वर्णानव रुन्धे ॥ **35**

**TS 2.4.11.6 - Padam**

अवेति । रुन्धे । तार्प्यम् । ददाति । पशून् । एव । अवेति ।

रुन्धे । धेनुम् । ददाति । आशिष इत्या – शिषः । एव । अवेति ।

रुन्धे । साम्नः । वै । एषः । वर्णः । यत् । हिरण्यम् । यजुषाम् ।

तार्प्यम् । उक्थामदानामित्युक्थ – मदानाम् । धेनुः । एतान् । एव ।

सर्वान् । वर्णान् । अवेति । रुन्धे ॥ **35 (30)**

***(जगत्या – ऽभिचरन्थ् सर्वो वै – गच्छति – यज्ञ – स्तेज एव – त्रिꣳशच्च) (A11)***

**TS 2.4.12.1**

त्वष्टा हतपुत्रो वीन्द्रꣳ सोममा ऽहरत् तस्मिन्निन्द्र उपहवमैच्छत

तं नोपाह्वयत पुत्रं मे ऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा

सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टा ऽऽहवनीयमुप प्रावर्तयथ्

स्वाहेन्द्रशत्रुर्वर्द्धस्वेति स यावदूर्द्ध्वः पराविद्ध्यति तावति स्वयमेव

व्यरमत यदि वा तावत् प्रवण – [ ] **36**

**TS 2.4.12.1 - Padam**

त्वष्टा । हतपुत्र इति हत - पुत्रः । वीन्द्रमिति वि - इन्द्रम् ।
सोमम् । एति । अहरत् । तस्मिन्न् । इन्द्रः । उपहवमित्युप-हवम् ।
ऐच्छत । तम् । न । उपेति । अह्वयत । पुत्रम् । मे । अवधीः ।
इति । सः । यज्ञवेशसमिति यज्ञ - वेशसम् । कृत्वा ।
प्रासहेति प्र - सहा । सोमम् । अपिबत् । तस्य । यत् ।
अत्यशिष्यतेत्यति - अशिष्यत । तत् । त्वष्टा ।
आहवनीयमित्या - हवनीयम् । उप । प्रेति । अवर्तयत् । स्वाहा ।
इन्द्रशत्रुरितीन्द्र - शत्रुः । वर्द्धस्व । इति । सः । यावत् । ऊर्द्ध्वः ।
पराविद्ध्यतीति परा - विद्ध्यति । तावति । स्वयम् । एव । वीति ।
अरमत । यदि । वा । तावत् । प्रवणमिति प्र - वनम् । **36 (50)**

**TS 2.4.12.2**

-मासीद्-यदि वा तावदद्ध्यग्नेरासीथ् स संभवन्नग्नीषोमावभि
समभवथ् स इषुमात्रमिषुमात्रं ँविष्वङ्ङ्वर्द्धत स इमान्
ँल्लोकानवृणोद्-यदिमान् ँल्लोकानवृणोत् तद्-वृत्रस्य

वृत्रत्वं तस्मादिन्द्रो ऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत् तपो

वै स वज्र आसीत् तमुद्यन्तुं नाशक्नोदथ वै तर्.हि विष्णु – [ ] 37

**TS 2.4.12.2 - Padam**

आसीत् । यदि । वा । तावत् । अधीति । अग्नेः । आसीत् । सः ।

संभवन्निति सं – भवन्न् । अग्नीषोमावित्यग्नी – सोमौ । अभि ।

समिति । अभवत् । सः । इषुमात्रमिषुमात्रमितीषुमात्रं – इषुमात्रम् ।

विष्वङ् । अवर्द्धत । सः । इमान् । लोकान् । अवृणोत् । यत् ।

इमान् । लोकान् । अवृणोत् । तत् । वृत्रस्य । वृत्रत्वमिति

वृत्र – त्वम् । तस्मात् । इन्द्रः । अबिभेत् । अपीति । त्वष्टा । तस्मै ।

त्वष्टा । वज्रम् । असिञ्चत् । तपः । वै । सः । वज्रः । आसीत् ।

तम् । उद्यन्तुमित्युत् – यन्तुम् । न । अशक्नोत् । अथ । वै ।

तर्.हि । विष्णुः । **37 (50)**

**TS 2.4.12.3**

–रन्या देवता ऽऽसीथ् सो ऽब्रवीद्–विष्णवेहीदमा हरिष्यावो

येनायमिदमिति स विष्णुस्त्रेधा ऽऽत्मानं ँविन्यधत्त पृथिव्यां

तृतीयमन्तरिक्षे तृतीयं दिवि तृतीय–मभिपर्यावर्ता**द्ध्य**बिभेद्–यत्–

पृथिव्यां तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्-विष्ण्वनुस्थितः

सो ऽब्रवीन्मा मे प्र हा-रस्ति वा इदं - [ ] 38

**TS 2.4.12.3 - Padam**

अन्या । देवता । आसीत् । सः । अब्रवीत् । विष्णो । एति । इहि ।

इदम् । एति । हरिष्यावः । येन । अयम् । इदम् । इति । सः ।

विष्णुः । त्रेधा । आत्मानम् । वि । नीति । अधत्त । पृथिव्याम् ।

तृतीयम् । अन्तरिक्षे । तृतीयम् । दिवि । तृतीयम् ।

अभिपर्यावर्तादित्यभि - पर्यावर्तात् । हि । अबिभेत् । यत् ।

पृथिव्याम् । तृतीयम् । आसीत् । तेन । इन्द्रः । वज्रम् ।

उदिति । अयच्छत् । विष्ण्वनुस्थित इति विष्णु - अनुस्थितः । सः ।

अब्रवीत् । मा । मे । प्रेति । हाः । अस्ति । वै । इदम् । 38 (50)

**TS 2.4.12.4**

मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णादधा

मेति तद्-विष्णवे ऽति प्रायच्छत् तद्-विष्णुः प्रत्यगृह्णा-दस्मास्विन्द्र

इन्द्रियं दधात्विति यदन्तरिक्षे तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्-

विष्ण्वनुस्थितः सो ऽब्रवीन्मा मे प्र हारस्ति वा इदं - [ ] 39

**TS 2.4.12.4 - Padam**

मयि । वीर्यम् । तत् । ते । प्रेति । दास्यामि । इति । तत् । अस्मै ।
प्रेति । अयच्छत् । तत् । प्रतीति । अगृह्णात् । अधाः । मा । इति ।
तत् । विष्णवे । अति । प्रेति । अयच्छत् । तत् । विष्णुः । प्रतीति ।
अगृह्णात् । अस्मासु । इन्द्रः । इन्द्रियम् । दधातु । इति । यत् ।
अन्तरिक्षे । तृतीयम् । आसीत् । तेन । इन्द्रः । वज्रम् । उदिति ।
अयच्छत् । विष्णवनुस्थित इति विष्णु – अनुस्थितः । सः ।
अब्रवीत् । मा । मे । प्रेति । हाः । अस्ति । वै । इदम् । **39 (50)**

**TS 2.4.12.5**

मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णाद् द्विर्मा
ऽधा इति तद्–विष्णवे ऽति प्रायच्छत् तद्–विष्णुः
प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यद्–दिवि तृतीयमासीत्
तेनेन्द्रो वज्रमुदयच्छद्–विष्णवनुस्थितः सो ऽब्रवीन्मा मे
प्र हार्येनाह – [ ] **40**

**TS 2.4.12.5 - Padam**

मयि । वीर्यम् । तत् । ते । प्रेति । दास्यामि । इति । तत् । अस्मै ।

प्रेति । अयच्छत् । तत् । प्रतीति । अगृह्णात् । द्विः । मा । अधाः ।

इति । तत् । विष्णवे । अति । प्रेति । अयच्छत् । तत् । विष्णुः ।

प्रतीति । अगृह्णात् । अस्मासु । इन्द्रः । इन्द्रियम् । दधातु । इति ।

यत् । दिवि । तृतीयम् । आसीत् । तेन । इन्द्रः । वज्रम् । उदिति ।

अयच्छत् । विष्णवनुस्थित इति विष्णु – अनुस्थितः । सः ।

अब्रवीत् । मा । मे । प्रेति । हाः । येन । अहम् । **40 (50)**

**TS 2.4.12.6**

–मिदमस्मि तत् ते प्र दास्यामीति त्वी(3) इत्यब्रवीथ् सन्धां तु

सं दधावहै त्वामेव प्रविशानीति यन्मां प्रविशेः किं मा भुञ्ज्या

इत्यब्रवीत् त्वामेवेन्धीय तव भोगाय त्वां प्रविशेयमित्यब्रवीत् तं ँवृत्रः

प्राविशदुदरं ँवै वृत्रः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो य – [ ] **41**

**TS 2.4.12.6 - Padam**

इदम् । अस्मि । तत् । ते । प्रेति । दास्यामि । इति । त्वी(3) । इति ।

अब्रवीत् । सन्धामिति सं – धाम् । तु । समिति । दधावहै । त्वाम् ।

एव । प्रेति । विशानि । इति । यत् । माम् । प्रविशेरिति प्र–विशेः ।
किम् । मा । भुञ्ज्याः । इति । अब्रवीत् । त्वाम् । एव । इन्धीय ।
तव । भोगाय । त्वाम् । प्रेति । विशेयम् । इति । अब्रवीत् । तम् ।
वृत्रः । प्रेति । अविशत् । उदरम् । वै । वृत्रः । क्षुत् । खलु । वै ।
मनुष्यस्य । भ्रातृव्यः । यः । **41 (50)**

**TS 2.4.12.7**

एवं वेँद हन्ति क्षुधं भ्रातृव्यं तदस्मै प्रायच्छत्तत् प्रत्यगृह्णात्–
त्रिर्मा ऽधा इति तद्–विष्णवे ऽति प्रायच्छत् तद्–विष्णुः
प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यत् त्रिः प्रायच्छत् त्रिः
प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वं यँद्–विष्णुरन्वतिष्ठत विष्णवे ऽति
प्रायच्छत् तस्मादैन्द्रावैष्णव८ं हविर्भवति ( ) यद्–वा इदं किञ्च
तदस्मै तत् प्रायच्छद् ऋचः सामानि यजू८ंषि सहस्रं वाँ अस्मै तत्
प्रायच्छत् तस्माथ् सहस्रदक्षिणं ॥ **42**

**TS 2.4.12.7 - Padam**

एवम् । वेद । हन्ति । क्षुधम् । भ्रातृव्यम् । तत् । अस्मै । प्रेति ।
अयच्छत् । तत् । प्रतीति । अगृह्णात् । त्रिः । मा । अधाः । इति ।

तत् । विष्णवे । अति । प्रेति । अयच्छत् । तत् । विष्णुः । प्रतीति ।

अगृह्णात् । अस्मासु । इन्द्रः । इन्द्रियम् । दधातु । इति । यत् ।

त्रिः । प्रेति । अयच्छत् । त्रिः । प्रत्यगृह्णादिति प्रति – अगृह्णात् ।

तत् । त्रिधातोरिति त्रि – धातोः । त्रिधातुत्वमिति त्रिधातु – त्वम् ।

यत् । विष्णुः । अन्वतिष्ठतेत्यनु – अतिष्ठत । विष्णवे । अति । प्रेति ।

अयच्छत् । तस्मात् । ऐन्द्रावैष्णवमित्यैन्द्रा – वैष्णवम् । हविः ।

भवति ( ) । यत् । वै । इदम् । किम् । च । तत् । अस्मै । तत् ।

प्रेति । अयच्छत् । ऋचः । सामानि । यजूꣳषि । सहस्रम् । वै ।

अस्मै । तत् । प्रेति । अयच्छत् । तस्मात् ।

सहस्रदक्षिणमिति सहस्र – दक्षिणम् ॥ **42 (71)**

*(प्रवणं – यँविष्णु– र्वा इद– मिद – महं – यँयो – भव –*

*त्येकविꣳशतिश्च) (A12)*

**TS 2.4.13.1**

देवा वै राजन्या–ज्जायमाना–दबिभयु–स्तमन्तरेव सन्तं दाम्ना

ऽपौम्भन्थ् स वा एषो ऽपोब्धो जायते यद्–राजन्यो यद्–वा एषो

ऽनपोब्धो जायेत वृत्रान् घ्न७ श्चरेद्–यं कामयेत राजन्य–मनपोब्धो
जायेत वृत्रान् घ्न७ श्चरेदिति तस्मा एतमैन्द्राबार्.हस्पत्यं चरुं
निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पति र्ब्रह्मणैवैनं ( ) दाम्नो ऽपोंभनान्
मुञ्चति हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नो ऽपोंभनान्
मुञ्चति ॥ **43**

**TS 2.4.13.1 - Padam**

देवाः । वै । राजन्यात् । जायमानात् । अबिभयुः । तम् । अन्तः ।
एव । सन्तम् । दाम्ना । अपेति । औंभन्न् । सः । वै । एषः ।
अपोब्ध इत्यप– उब्धः । जायते । यत् । राजन्यः । यत् । वै ।
एषः । अनपोब्ध इत्यनप – उब्धः । जायेत । वृत्रान् । घ्नन्न् ।
चरेत् । यम् । कामयेत । राजन्यम् । अनपोब्ध इत्यनप – उब्धः ।
जायेत । वृत्रान् । घ्नन्न् । चरेत् । इति । तस्मै । एतम् ।
ऐन्द्राबार्.हस्पत्यमित्यैन्द्रा–बार्.हस्पत्यम् । चरुम् । निरिति । वपेत् ।
ऐन्द्रः । वै । राजन्यः । ब्रह्म । बृहस्पतिः । ब्रह्मणा । एव ।
एनम् ( ) । दाम्नः । अपोंभनादित्यप–उंभनात् । मुञ्चति ।

हिरण्मयम् । दाम । दक्षिणा । साक्षादिति स-अक्षात् । एव । एनम् ।
दाम्नः । अपोंभनादित्यप - उंभनात् । मुञ्चति ॥ **43 (62)**

*(एनं - द्वादश च) (A13)*

**TS 2.4.14.1**

नवोनवो भवति जायमानो ऽह्नां केतुरुषसामेत्यग्रे ।
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायुः ॥
यमादित्या अꣳशुमाप्याययन्ति यमक्षित-मक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः ॥
प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां ँवृत्रहन् वृत्रहा ऽसि ।
यत्र यन्ति स्रोत्यास्त - [ ] **44**

**TS 2.4.14.1 - Padam**

नवोनव इति नवः - नवः । भवति । जायमानः । अह्नाम् । केतुः ।
उषसाम् । एति । अग्रे ॥ भागम् । देवेभ्यः । वीति । दधाति ।
आयन्नित्या - यन्न् । प्रेति । चन्द्रमाः । तिरति । दीर्घम् । आयुः ॥
यम् । आदित्याः । अꣳशुम् । आप्याययन्तीत्या - प्याययन्ति । यम् ।
अक्षितम् । अक्षितयः । पिबन्ति ॥ तेन । नः । राजा । वरुणः ।

बृहस्पतिः । एति । प्याययन्तु । भुवनस्य । गोपा इति गो – पाः ॥

प्राच्याम् । दिशि । त्वम् । इन्द्र । असि । राजा । उत । उदीच्याम् ।

वृत्रहन्निति वृत्र – हन्न् । वृत्रहेति वृत्र – हा । असि ॥

यत्र । यन्ति । स्रोत्याः । तत् । **44 (50)**

**TS 2.4.14.2**

–ज्जितं ते दक्षिणतो वृषभ एधि हव्यः ॥

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयाति ।

विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथाऽसत् ॥

अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् ।

स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।

ईशान– [ ] **45**

**TS 2.4.14.2 - Padam**

जितम् । ते । दक्षिणतः । वृषभः । एधि । हव्यः ॥

इन्द्रः । जयाति । न । परेति । जयातै । अधिराज इत्यधि – राजः ।

राजस्विति राज – सु । राजयाति ॥ विश्वाः । हि । भूयाः । पृतनाः ।

अभिष्टीः । उपसद्य इत्युप – सद्यः । नमस्यः । यथा । असत् ॥

अस्य । इत् । एव । प्रेति । रिरिचे । महित्वमिति महि – त्वम् ।

दिवः । पृथिव्याः । परीति । अन्तरिक्षात् ॥ स्वराडिति स्व – राट् ।

इन्द्रः । दमे । एति । विश्वगूर्त इति विश्व–गूर्तः । स्वरिः । अमत्रः ।

ववक्षे । रणाय ॥ अभीति । त्वा । शूर । नोनुमः । अदुग्धाः । इव ।

धेनवः ॥ ईशानम् । **45 (50)**

## TS 2.4.14.3

–मस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ॥

त्वामिद्धि हवामहे साता वाजस्य कारवः ।

त्वां ँवृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

यद्द्यावइन्द्रतेशतꣳ शतं भूमीरुत स्युः ।

न त्वा वज्रिन्थ् सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी ॥

पिबा सोममिन्द्र मन्दतु त्वा यन्ते सुषाव हर्यश्वाद्रिः । **46**

## TS 2.4.14.3 - Padam

अस्य । जगतः । सुवर्दृशमिति सुवः – दृशम् । ईशानम् । इन्द्र ।

तस्थुषः ॥ त्वाम् । इत् । हि । हवामहे । साता । वाजस्य । कारवः ॥

त्वाम् । वृत्रेषु । इन्द्र । सत्पतिमिति सत् – पतिम् । नरः । त्वाम् ।

काष्ठासु । अर्वतः ॥ यत् । द्यावः । इन्द्र । ते । शतम् । शतम् ।

भूमीः । उत । स्युः ॥ न । त्वा । वज्रिन्न् । सहस्रम् । सूर्याः ।

अन्विति । न । जातम् । अष्ट । रोदसी इति ॥ पिब । सोमम् । इन्द्र ।

मन्दतु । त्वा । यम् । ते । सुषाव । हर्यश्वेति हरि – अश्व ।

अद्रिः ॥ **46 (50)**

**TS 2.4.14.4**

सोतुर्बाहुभ्या॰ सुयतो नार्वा ॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

क्षुमन्तो याभिर्मदेम ॥

उदग्ने शुचयस्तव वि ज्योतिषो दुत्यं जातवेदस॰

सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।

शोचिष्केशं ँविचक्षण ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आ ऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा

जगतस्तस्थुष – [ ] 47

**TS 2.4.14.4 - Padam**

सोतुः । बाहुभ्यामिति बाहु - भ्याम् । सुयत इति सु - यतः ।

न । अर्वा ॥ रेवतीः । नः । सधमाद इति सध - मादः । इन्द्रे ।

सन्तु । तुविवाजा इति तुवि - वाजाः ॥ क्षुमन्तः । याभिः ।

मदेम ॥ उदिति । अग्ने । शुचयः । तव । वीति । ज्योतिषा । उदिति ।

उ । त्यम् । जातवेदसमिति जात - वेदसम् । सप्त । त्वा । हरितः ।

रथे । वहन्ति । देव । सूर्य ॥ शोचिष्केशमिति शोचिः - केशम् ।

विचक्षणेति वि - चक्षण ॥ चित्रम् । देवानाम् । उदिति । अगात् ।

अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ॥ एति । अप्राः ।

द्यावापृथिवी इति द्यावा - पृथिवी । अन्तरिक्षम् । सूर्यः । आत्मा ।

जगतः । तस्थुषः । 47 (50)

**TS 2.4.14.5**

श्च ॥

विश्वे देवा ऋतावृध ऋतुभिर्. हवनश्रुतः ।

जुषन्तां ँयुज्यं पयः ॥

विश्वे देवाः शृणुतेम७ं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।

ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्.हिषि

मादयद्ध्वं ॥ **48**

**TS 2.4.14.5 - Padam**

च ॥ विश्वे । देवाः । ऋतावृध इत्यृत – वृधः । ऋतुभिरित्यृतु–भिः ।

हवनश्रुत इति हवन – श्रुतः ॥ जुषन्ताम् । युज्यम् । पयः ॥ विश्वे ।

देवाः । शृणुत । इमम् । हवम् । मे । ये । अन्तरिक्षे । ये । उपेति ।

द्यवि । स्थ ॥ ये । अग्निजिह्वा इत्यग्नि – जिह्वाः । उत । वा ।

यजत्राः । आसद्येत्या – सद्य । अस्मिन्न् । बर्.हिषि ।

मादयद्ध्वम् ॥ **48 (30)**

***(त – दीशान – मद्रि – स्तस्थुष – स्त्रि७ंशच्च) (A14)***

============================

**Prasna Korvai with starting Padams of 1 to 14 Anuvaakams :-**

(देवा मनुष्या – देवसुरा अब्रुवन् – देवासुरास्तेषां गायत्री – प्रजापतिस्ता यत्रा – ग्ने गोभि – श्चित्रया – मारुतं – देवा वसव्या अग्ने – मारुतमिति – देवा वसव्या देवाः शर्मण्याः – सर्वाणि – त्वष्टा हतपुत्रो – देवा वै राजन्यान् – नवोनव – श्चतुर्दश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(देवा मनुष्याः – प्रजां पशुन् – देवा वसव्याः – परिदद्ध्यादिद– मस्म्य – ष्टा चत्वारिꣳशत् )

**First and Last Padam of Fourth Prasnam of Kandam 2:-**

(देवा मनुष्या – मादयद्ध्वं)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे द्वितीयकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

## Summary breakup of Padam - in Kaandam 2, Prasnam 4

| Particulars | | Example ( in Pada PaaTam) | No. of Padams as per Pada PaaTam |
|---|---|---|---|
| सामान्य पदानि | Ord | इषे । त्वा । ऊर्जे । | 1924 |
| उपसर्ग पदानि | PRE | एति = (आ+इति) । उपेति = (उप+इति) । प्रेति = (प्र+इति) । | 178 |
| वेष्टन पदानि | PS | उपायवः = उपायव इत्युप - आयवः ।<br>बाहुभ्याम् = बाहुभ्यामिति बाहु - भ्याम्) । | 295 |
| प्रग्रह पदानि | PG | ते = (ते इति) । त्वे = (त्वे इति) । चक्षुषी = (चक्षुषी इति) ।<br>विष्णो = विष्णो इति । | 7 |
| प्रग्रह वेष्टन पदानि | PGS | अधिषवणे = अधिषवणे इत्यधि - सवने ।<br>इन्द्राग्नी = इन्द्राग्नी इतीन्द्र - अग्नी | 2 |
| | | **Total Padams** | 2406 |

## Details of Panchati and Padam for Kandam 2 , Prasanam 4 (TS 2.4)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 204 |
| Anuvakam 2 | 4 | 199 |
| Anuvakam 3 | 3 | 145 |
| Anuvakam 4 | 3 | 153 |
| Anuvakam 5 | 2 | 88 |
| Anuvakam 6 | 2 | 112 |
| Anuvakam 7 | 2 | 92 |
| Anuvakam 8 | 2 | 120 |
| Anuvakam 9 | 4 | 179 |
| Anuvakam 10 | 3 | 171 |
| Anuvakam 11 | 6 | 280 |
| Anuvakam 12 | 7 | 371 |
| Anuvakam 13 | 1 | 62 |
| Anuvakam 14 | 5 | 230 |
| Total → | 48 | 2406 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in.**